# ॥ वरुणकृत सुन्दरेश्वर स्तोत्रम् ॥

कल्याणशैलपरिकल्पितकार्मुकाय
मौर्वीकृताखिलमहोरगनायकाय ।
पृथ्वीरथाय कमलापतिसायकाय
हालास्यमध्यनिलयाय नमश्शिवाय ॥ १ ॥

भक्तार्तिभञ्जनपराय परात्पराय
कालाभ्रकान्तिगरळाङ्कितकन्धराय ।
भूतेश्वराय भुवनत्रयकारणाय
हालास्यमध्यनिलयाय नमश्शिवाय ॥ २ ॥

भूदारमूर्तिपरिमृग्यपदाम्बुजाय
हंसाब्जसम्भवसुदूरसुमस्तकाय ।
ज्योतिर्मयस्फुरितदिव्यवपुर्धराय
हालास्यमध्यनिलयाय नमश्शिवाय ॥ ३ ॥

कादम्बकाननिवासकुतूहलाय
कान्तार्धभागकमनीयकळेवराय ।
कालान्तकाय करुणामृतसागराय

हालास्यमध्यनिलयाय नमश्शिवाय ॥ ४ ॥

विश्वेश्वराय विबुधेश्वरपूजिताय
विद्याविशिष्टविदितात्मसुवैभवाय ।
विद्याप्रदाय विमलेन्द्रविमानगाय
हालास्यमध्यनिलयाय नमश्शिवाय ॥ ५ ॥

सम्पत्प्रदाय सकलागममस्तकेषु
सङ्घोषिताय विभवाय महेश्वराय ।
सर्वात्मने सकलदुःखसमूलहन्त्रे
हालास्यमध्यनिलयाय नमश्शिवाय ॥ ६ ॥

गङ्गाधराय गरुडध्वजवन्दिताय
गण्डस्फुरद्भुजगमण्डलमण्डिताय ।
गन्धर्वकिन्नरसुगीतगुणात्मकाय
हालास्यमध्यनिलयाय नमश्शिवाय ॥ ७ ॥

पाणिं प्रगृह्य मलयध्वजभूपपुत्र्याः
पाण्ड्येश्वरः स्वयमभूत्परमेश्वरो यः ।
तस्मै जगत्प्रथितसुन्दरपाण्ड्यनाम्ने

हालास्यमध्यनिलयाय नमश्शिवाय ॥ ८ ॥

गीर्वाणदेशिकगिरामपि दूरगं यत्
वक्तुं महत्त्वमिह को भवतः प्रवीणः ।
शम्भो क्षमस्व भगवन् चरणारविन्द-
भक्त्या कृतां स्तुतिमिमां मम सुन्दरेश ॥ ९ ॥

॥ इति हालास्यमाहात्म्ये वरुणकृत सुन्दरेश्वर स्तोत्रम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]